[Shlokas at the beginning]

देव देव जगन्नाथ पुण्य श्रवण कीर्तना।
सप्ताह श्रवणमं देव सफलं कुरु सर्वथा।।

संसारसागरे मग्नं दीनं मां करुणानिधे।
कर्ममोह गृहीतांगम मां उद्धर भवार्णावात्।।

श्रीमद् भागवताख्योयं प्रत्यक्षः कृष्ण एव हि।
स्वीकृतोसि मया नाथ मुक्त्यर्थं भवसागरे।।

मनोरथो मदीयोयं सफलः सर्वथा त्वया।
निर्विघ्नेनैव कर्तव्यो दासोहं तव केशव।।

शुकरूप प्रबोधज्ञ सर्वशास्त्रविशारद ।
एतत् कथा प्रकाशेन मदज्ञानं विनाशय।।

[Bhagavata Dhyana Shlokas]

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ।।

गुरुर्ब्रह्मा गुरुर्विष्णु र्गुरुर्देवो महेश्वर।
गुरु साक्षात् परब्रह्मा तस्मै श्रीगुरवे नमः।।

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ।।

व्यासाय विष्णुरूपाय व्यासरूपाय विष्णवे।
नमो वै ब्रह्मनिधये वासिष्ठाय नमो नमः।।

जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्।
तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत्सूरयः।।

तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गोऽमृषा।
धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि।।

कस्मै येन विभासितोऽयमतुलो ज्ञानप्रदीपः पुरा।

तद्रूपेण च नारदाय मुनये कृष्णाय तद्रूपिणा ॥

योगीन्द्राय तदात्मनाथ भगवद्राताय कारुण्यत-।

स्तच्छुद्धं विमलं विशोकममृतं सत्यं परं धीमहि ॥

धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सतां।

वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम् ॥

श्रीमद्भागवते महामुनिकृते किं वा परैरीश्वरः।

सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात् ॥

निगमकल्पतरोर्गलितं फलं

शुकमुखादमृतद्रवसंयुतम् ।

पिबत भागवतं रसमालयं

मुहुरहो रसिका भुवि भावुकाः ॥

यं प्रव्रजन्तमनुपेतमपेतकृत्यं।

द्वैपायनो विरहकातर आजुहाव ॥

पुत्रेति तन्मयतया तरवोऽभिनेदु-
स्तं सर्वभूतहृदयं मुनिमानतोऽस्मि।।

यः स्वानुभावमखिल श्रुतिसारमेकं
    अध्यात्मदीपं अतितितीर्षतां तमोऽन्धम् ।
संसारिणां करुणयाऽऽह पुराणगुह्यं
    तं व्याससूनुमुपयामि गुरुं मुनीनाम् ।।

सच्चिदानन्द रूपाय विश्वोत्पत्यादि हेतवे ।
तापत्रय विनाशाय श्री कृष्णाय वयं नुमः ।।

कृष्णाय वासुदेवाय देवकी नन्दनाय च।
नन्दगोप कुमाराय गोविन्दाय नमो नमः।।

नमः पंकज नाभाय नमः पंकज मालिने।
नमः पंकज नेत्राय नमस्ते पंकजांघ्रये ।।

कृष्णाय वासुदेवाय हरये परमात्मने।
प्रणतः क्लेशनाशाय गोविंदाय नमो नमः।।

पीताम्बरं कर विराजित शङ्ख चक्र।
कौमोदकी सरसिजं करुणा समुद्रम्।।
राधा सहायं अति सुन्दर मन्दहासम्।
वातलयेशम् अनिशं हृति भावयामि।।

नामसंकीर्तन यस्य सर्वपापप्रणाशनम्।
प्रणामो दुःखशमनस्तं नमामि हरिं परम्।।

सत्यव्रतं सत्यपरं त्रिसत्यंसत्यस्य योनिं निहितं च सत्ये।
सत्यस्य सत्यमृतसत्यनेत्रंसत्यात्मकं त्वां शरणं प्रपन्नाः ।।
सत्यस्य सत्यं रुतसत्यनेत्रं सत्यात्मकं त्वां शरणं प्रपन्नाः।

श्री हरये नमः   श्री हरये नमः   श्री हरये नमः
गोपिका जीवनस्मरणं गोविन्दा गोविन्दा
□□□□□□□□□□□□□□□□□

[**After Reading Parayanam**]

स्वस्ति प्रजाभ्यः परिपालयंतां ।

न्याय्येन मार्गेण महीं महीशाः ।।

गोब्राह्मणेभ्यश्शभमस्तु नित्यं।

लोकास्समस्ता सुखिनो भवन्तु।।

काले वर्षतु पर्जन्यः।पृथ्वि सस्यशालिनि।

देशोयम क्षोभरहितःब्राह्मणास्सन्तुनिर्भयाः।।

अपुत्रा पुत्रिणः सन्तु पुत्रिणः सन्तु पौत्रिणः।

अतनाः सतनाः सन्तु जीवन्तु शरतां शतं।।

कायेन वाचा मनसेन्द्रियैर्वा

बुद्ध्यात्मना वा प्रकृतेः स्वभावात्।

करोमि यद्यत् सकलं परस्मै

नारायणायेति समर्पयामि।।

ओम तत्सत् श्री क्रुष्णारपणमसंतु।।

[Bhagvad Aarthi]

जय जय भागवत देवा जय जय भागवत।

जय जय राधाकृष्ण स्वरूपा जय जय भागवत।। (देव जय जय...)

पडुतर मरुभूमौ, चरताम् पथि पथि परिपतताम्।

प्रतिपद ललितं त्वां त्यक्त्वा परमसुखं कुतः ।। (देव जय...)

 परमपदे भगवान्! भक्तपरिपालन गुणवान्।

कमलभवाय कृपाय त्वाम् निज! कमलमुखेन ददौ।। (देव जय जय ....)

नव नव रसभरितम् दिव्यम् नारायण मुखगलितम्।

नलिनासन देवः प्रददौ नारदमुनये त्वां।।(देव जय....)

अलोड्याखिल शास्त्रम् ! भगवान् अनवाप्य मन:शांतिम्।

आस्वाद्ध्यातुल रसं ते शाश्वतं आनंदमापपरम्।। (देव जय जय...)

निगमांततरोर्गलितम् मधुरम् निरवद्ध्य पद लसितम्।

निर्गुण निष्टोपि - श्री शुकः नित्यम् पिबति त्वां।। (देव जय जय...)

कलिमल हरणम् त्वां श्रृत्वा कैवल्य सुखप्रदम्।

कृष्ण प्रेम निमग्नो राधाकृष्ण पदांबुजमाप।। (देव जय जय...)

जय जय भागवत देव जय जय भागवत।

जय जय राधाक्रृष्ण स्वरूप जय जय भागवत ।। (जय जय....)

□□□□□□□□□□□□□□□